International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 306-311
© 2023 IJSR
www.anantaajournal.com
Received: 02-02-2023
Accepted: 04-03-2023

**Sumanta Bhaskar**
Research Scholar,
Department of Vyakarana,
National Sanskrit University,
Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Sumanta Bhaskar**
Research Scholar,
Department of Vyakarana,
National Sanskrit University,
Tirupati, Andhra Pradesh, India

# आचार्यभवनाथशास्त्रीकृतप्रयोगपल्लवग्रन्थे पाणिनीयदिशा सेडनिड्विभागविमर्शः

**Sumanta Bhaskar**

## प्रस्तावना

प्रयोगपल्लवस्यास्य ग्रन्थस्य प्रयोगस्य प्राधान्यत्वात् प्रयोगः महद्रूपेण उत्कृष्टतां भजते ग्रन्थेऽस्मिन्। प्राथाम्येनात्र प्रयोगसाधनस्य प्रारम्भं चिन्तयामश्चेत् धातूनां प्रयोगस्य चिकीर्षायां धातूनाम् औचित्येन ग्रहणं तथा च धातुषु सर्वेष्वपि प्रयोगेषु अनुबन्धलोपस्य च कारणता अवश्यमेव स्वस्य उत्कृष्टां जनयति। अतः प्रयोगात् पूर्वमेव धातूनाम् अनुबन्धलोपविषये किञ्चित् प्रारम्भनं प्रदश्यर्ते।

भाषयैव लोकव्यवहारः प्रवर्तते। भाषा यदि न स्यात् तर्हि जगदिदं तमसि मज्जेत। तस्याश्च भाषायाः शुद्धये व्याकरणज्ञानं नितरामपेक्षते। अस्ति च शास्त्रस्यास्य तादृशं माहात्म्यम्, अत एव मुखं व्याकरणं स्मृतम् इति वेदपुरुषस्य मुखत्वेन स्थानम् अलंकुर्वत् वेदानां रक्षकत्वाद् प्रकृतिप्रत्यययोगेन वेदार्थस्यावबोधने महत्स्थानं धत्ते शास्त्रमिदम्। लक्ष्यलक्षणे व्याकरणम्[i] इति साधुत्वसम्पादने शब्दानाम् इति च व्याकरणशास्त्रस्य लक्ष्यम्। तत्र च प्रक्रिया निष्पादितस्य शब्दस्य पदमिति अभिधानम्। पदत्वं च सुबन्तस्य तिङन्तस्य च भवति। धातुतः तिङ्प्रत्ययः यदा प्रयुज्यते तदा तिङन्तम् इति पदं निष्पद्यते। अस्य च धातोः अर्थद्वयं भवति। एकं फलं व्यापारश्च अपरः भवति।

व्याकरणविदां मतेन पचति, पठति इत्यादिषु क्रियात्रयेषु तिङंशम् (ति) इति विहाय शेषाः भागाः (पच्, पठ्) अर्थदृष्ट्या धात्वंशाः सन्ति। पच् तथा पठ् इत्येतौ धातुविशेषरूपेण भिन्नौ, तयोः विशेषार्थश्चापि परस्परं भिन्नः । परन्तु तेषाम् अर्थः फलं व्यापारश्च वर्तते "फलव्यापारयोर्धातुः[ii]" इति वचनसार्थक्यमेति। फलव्यापारयोः अर्थः उदाहरणेन व्याख्यातुं शक्यते। यथा देवदत्तस्तण्डुलान् पचति अर्थात् पाककर्तृकतण्डुलकर्मकव्यापारवान् देवदत्तः अयं भावः।, अस्मिन् वाक्ये – देवदत्तस्य पात्रं चुल्लिकायाः स्थापनादारभ्य तण्डुलस्य द्रवणपर्यन्तं सिद्धतापर्यन्तं वा समग्रमपि कर्म कथ्यते तच्च कार्यक्रमः कार्यकलापो वा पच्धातोरेव अर्थो विद्यते।

तण्डुलानां द्रवणं भवति फलं तथा शेषं कार्यं व्यापार एव ।

**सेडनिड्विभाग**

ननु धातुरिति कथं बुध्यते इति चेदुच्यते भूवादयो धातवः इति सूत्रेण भूः इत्यतः आरभ्य धातुपाठे ये धातवः ते समेऽपि धातुपदवाच्याः। ननु सनाद्यन्ता धातवः इति योगबलेन साध्यं अपि धातवः भवन्ति खलु अत्रोच्यते यत् धातवः द्विविधाः भवन्ति। औपदेशिकाः आतिदेशिकाश्च भूवादयो धातवः इत्यनेन लब्धधातुसंज्ञाः पाणिनीयसूत्रपाठे धातवः ये वर्तन्ते तेषां समेषाम् औपदेशिकत्वेन व्यवहारः। पुनः सन् क्यच् काम्यच् क्यङ् क्यष् अथाचार क्विब् णिज् यङ् यक् आय ईयङ्[iii] इति द्वादशभिः प्रत्ययैः निष्पादिताः ये धातवः सनाद्यन्ता धातवः[iv] इति सूत्रेण क्रियमाणाः धातुसंज्ञकाः आतिदेशिकाः इति उच्यन्ते। तत्र च धातुभ्यः केचन प्रत्ययाः विधीयन्ते तेषु केचन सार्वधातुकसंज्ञकाः केचन आर्धधातुकसंज्ञकाः। येभ्यः धातुभ्यः परम् विहिताः तिङ्प्रत्ययाः शितः भवन्ति ते सर्वे अपि धातवः सार्वधातुकाः भवन्ति। शकारः इत् यस्य सः शित् भवति। ते च शित्प्रत्ययाः तिङ्शित्सार्वधातुकम्[v] इति योगेन सार्वधातुकाः भवन्ति। अन्ये च प्रत्ययाः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञकाः भवन्ति। तत्र च केचन धातवः सेड्धातवः केचन च अनिड्धातवः भवन्ति। तत्र के तावत् सेडः के तावत् अनिटः वर्तन्ते इति विषये किञ्चित् विचार्यते। किं तावत् अस्य सेडनिड्विभागे तात्पर्यम् इति चेदुच्यते अग्रे लृड्योगादिसाधने बह्वायासव्यावृतिः न भवति इति सेडनिड्विभागाय उच्यते - अथ सेडनिड्विभागः[vi] इति। कथं च विज्ञायते केषां धातूनां सेड्वं केषां च धातूनाम् अनिड्वम् इति प्रसङ्गे सामान्यतः वक्तुं शक्यते यत् ये धातवः धातुपाठे उदात्तत्वेन पठिताः ते सेटः अपि च ये धातवः धातुपाठे अनुदात्तत्वेन पठिताः ते धातवः अनिटः भवन्ति।यथा भूधातुः धातुपाठे उदात्तः पठितः अतः अस्य परं विधीयमानात् प्रत्ययात् पूर्वं इडागमो भवति यथोपदिष्टम्। तत्र च उपदेशः इति आद्योच्चारणम् भवति। तत्र पाणिनिमुनिप्रणीते धातुपाठे धातवः उपदेशत्वेन उपदिष्टाः यथा उदाहरणत्वेन वक्तुम् शाक्यते - भू सत्तायाम्, लूञ् छेदने इति। तत्र च धातूनाम् विषये विस्तृतं विवरणं प्राप्यते। धातवः अजन्ताः हलन्ताः च भवन्ति। तत्र तावत् के सेटः इति उच्यन्ते –

**१.एकवर्णानां मध्ये ऊदन्ता ॠदन्ताश्च सर्वे एव सेटः**[vii]

अर्थात् समेषां धातूनां मध्ये एकवर्णाः स्वल्पाः ते ऊदन्ताः धातवः अर्थात् भू सत्तायाम् लूञ् छेदने, पूञ् पवने इति धातवः सेटः अपि च ॠदन्तेषु कॄ विक्षेपे पॄ पालनपूरणयोः, गॄ निगरणे इत्येते धातवः सेट्धातुत्वेन गण्यन्ते।

**२. उदन्ता युरुनुस्नुक्षुक्ष्णवः**[viii]

**उदन्तेषु** यु मिश्रणामिश्रणयोः रु शब्दे, नु स्तुतौ, स्नु प्रस्रवणे, टुक्षु शब्दे क्ष्णुक्षु तेजने एते एव धातवः भवन्ति।

**३.ॠदन्तौ वृङ-वृञौ**

ॠदन्तौ ह्रस्वऋवर्णान्तौ वृञ् वरणे, एतौ सेटौ भवतः।

**४.इकारान्ताः श्विश्रिशीङ्डीङश्चेति**

अत्र ह्रस्वेकारान्ताः धातवः पुनश्च दीर्घेकारान्ताः धातवः गृह्यन्ते। यथा श्विश्रिशीङ् डीङश्च टुओश्वि गतिवृद्ध्योः श्रिञ् सेवायाम्, शीङ् स्वप्ने, डीङ्विहायसा गतौ इति एते धातवः सेड्धातवः भवन्ति।

**५.द्विवर्णानां मध्ये अनिट्**

द्विवर्णानाम् एकवर्णभिन्नानां मध्ये अनिट्धातवः स्वल्पाः अतः तान् कथयति शकिरेकः कान्तः अत्र शकि इत्यनेन शक्ऌ गतौ इति धातु ग्राह्यः।

**६.पचिवचिसिचिरिचिविचिमुचयश्चान्ताः**

पचिवचीति अर्थात् डुपचष् पाके, वच परिभाषणे, षिचिरक्षरणे, रिचिर् विरेचने, विचर् पृथग्भावे, मुच्लृ मोक्षणे, एते चकारान्ताः धातवः अनिटः भवन्ति।

**७.प्रच्छिरेकश्छान्तः**

प्रच्छ जीप्सायाम् इति एकः एव धातुः छान्तः अनिट् च।

**८.युजिरुजिभुजिरञ्जिभजिभञ्जिष्वञ्जिसञ्जित्यजिभ्रस्जियजिमस्जिसृजिणिजिविजयो जान्ताः**

युजिरुजीति। युजिर् योगे। रुजो भङ्ग। रञ्ज रागे। भुज पालनाभ्यवहारयोः, भुजो कौटिल्ये द्वावपि। भज सेवायाम्। भञ्जो आमर्दने। ष्वञ्ज परिष्वङ्गे। षञ्ज सङ्गे। त्यज हानौ। भ्रस्जो पाके। यज देवपूजायाम्। टुमस्जो शुद्धौ। सृज विसर्गो। णिजिर् शौचपोषणयोः। विजिर् पृथग्भावे, इति अमी धातवः अनिटः भवन्ति।[ix]

**९.रिशिरुशिकुशिलिशिविशिदिशिदृशिस्पृशिमृशिदंशयः शान्ताः –**

रिश रुश हिंसायाम्। ऋश हिंसायाम् आह्वाने रोदने च। लिश अल्पीभावे। विश प्रवेशने। दिश अतिसर्जने। दृशिर् प्रेक्षणे। स्पृश स्पर्शने। मृश आमर्शने। दंश दशने, अमी धातवः अनिटः भवन्ति।

**१०.त्विषिपुष्यतिकृषिश्लिषिद्विषिपिषिशिषिशुषिविषितुषिदुषयः षान्ताः**

त्विष दीप्तौ। पुष पुष्टौ। कृष विलेखने। श्लिष आलिङ्गने। द्विप अप्रीतौ। पिष्लृ संचूर्णने। शिष्ट विशेषणे। शुष शोषे। विष्लृ व्याप्तौ। तुष तुष्टौ। दुष वैकृत्ये, इति एते धातवः अनिड्वातुत्वेन परिगणिताः।

**११. दहिदुहिदिहिमिहिरुहिलिहिणहिवहयो हान्ताः**

दह भस्मीकरणे। दुह प्रपूरणे। दिह उपचये। मिह सेचने। रह जन्मनि प्रादुर्भावे च। लिह आस्वादने। णह बन्धने। वह प्रापणे- इत्येते धातवः अनिटः भवन्ति।

**१२.अदितुदिनुदिक्षदिस्विद्यतिविद्यतिविन्दतिविनदिछिनत्तिभिदिहदिपदिशदिसदिखिदिस्कन्दयोदान्ताः**

अद भक्षणे। तुदं व्यथने। नुद प्रेरणे। क्षुदिर् सम्पेषणे। ञिष्विदा गात्रप्रसरणे। विद सत्तायाम्। विद्लृ लाभे। विद विचारणे। छिदिर द्वैधीकरणे भिदिर् विदारणे। हद पुरीपोत्सर्गँ। शद्लृ शातने। पद्लृ विशरणगत्यवसादनेषु। पद गतौ। खिद दैन्ये। स्कन्दिर् गति-शोषणयोः इति धातवः अनिटः भवन्ति।

**१३.राधिरुधिक्रुधिक्षुधिबन्धिशुधिसिध्यतिबुद्ध्यतिव्यधियुधिसाधयो धान्ता**

राध साध संसिद्धौ। रुधिर् आवरणे। क्रुध कोपे। क्षुध बुभुक्षायाम्। बन्ध बन्धने। शुध शौचे। षिधू संराद्धौ। बुध अवगमे। व्यध ताडने। युध सम्प्रहारे इत्येते धातवः अनिटः।

**१४.वसतिघसती सान्तौ** - वस निवासे। घस्लृ अदने इमौ धातौ अनिटौ भवतः।

**१५.आपितपितिपिस्वपिवपिशपिछुपिक्षिपिलुपिलिपिसृपयः पान्ताः**

आप्लृ व्याप्तौ। तप सन्तापे। तिप्लृ क्षरणे। ञिष्वप् शये। टुवप बीजसन्ताने। शप आक्रोशे। छुप स्पर्शे छुप निन्दायां द्वावपि। क्षिप प्रेरणे। लुप्लृ छेदने। लिप उपदाहे। सप्लृ गतौ इत्येते धातवः पकारान्ताः अनिटः भवन्ति।

**१६.यभिरभिलभयो भान्ताः**

यभ मैथुने । रभ राभस्ये। डुलभष् प्राप्तौ एते धातवः भान्तेषु अनिटः भवन्ति ।

**१७.यमिरमिनमिगमयो मान्ताः** । यम उपरमे । रमु क्रीडायाम्। नम प्रह्वत्वे शब्दे च। गम्लृ गतौ इति मान्ताः धातवः अनिटः भवन्ति।

**१८.हन्यमन्यतीनान्तौ चेति एतेऽनिटः**

हन हिंसागत्योः। मनु अवबोधने इत्येतौ धातौ अनिटौ भवतः।

**१९. स्वरति सूति-सूयति-धञ्‌ ऊदितो विकल्पेन**

स्व शब्दोपतापयोः। षूङ प्राणिगर्भविमोचने। पूञ प्रस कम्पने। ऊदित ऊकारानुबन्धाः क्षमूष सहते मृजत् शुद्धौ प्रभृतयः इमे धातवः वेटः[x] भवन्ति। अर्थात् एतेषां धातूनां विकल्पेन इडागमः भवति।

**२०.रधादयश्च**

रधिस्तृपिर्दृपिश्चैव मुहिर्द्रुहिः ष्णुहिस्तथा।
ष्निहिर्णशिभिर्वन्त्येते रधादयः क्त-पञ्चिनः ॥[xi]

अत्र कारिकायां रधादयो धातवः विशेषेण पर्यालोचिताः। कारिकायांश्चास्यां चकारोऽप्यर्थः विकल्पेनानिट् इत्यस्याकर्षक इति भावार्थः। रधादिगणपठितानां विकल्पेन इडागमः भवति। के च ते तावत् रधादिगणपठिताः रुधादयः ? रध हिंसासंराध्योः। णश अदर्शने। तृप प्रीणने। दृप हर्षणमोच नयोः। द्रुह जिघांसायाम्। मुह वैचित्ये। ष्णिह आप्रीतौ। ष्णुह उद्गरणे इत्यष्टौ।

**तत्र च प्रसिद्धा काचित् कारिका**

ऊदृदन्तैर्योतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥[xii]

कान्तेषु शक्लेकः। चान्तेषु पच्-मुच्-रिच्-वच्-विच्-सिचः षट्। छान्तेषु प्रच्छेकः। जान्तेषु त्यज्-निजिर्-भज्-भञ्ज्-भुज्-भ्रस्ज्-मस्ज्-यज्-युज्-रुज्-रञ्ज्-विजिर्-स्वञ्ज्-सञ्ज्-सृजः पञ्चदश। दान्तेषु अद्-क्षुद्-खिद्-छिद्-तुद्-नुद्-पद्य-भिद्-विद्यति-विनद्-विन्द्-शद्-स्विद्-स्विद्य-स्कन्द्-हदः डश। धान्तेषु क्रुध्-क्षुध्-बुध्य-बन्ध्-युध्-रुध्-राध्-व्यध्-साध्-शुध्-सिद्ध्या एकादश। नान्तेषु मन्य-हनी द्वौ। पान्तेषु आप्-छुप्-क्षिप्-तप्-तिप्-तृप्य-दृप्य-लिप्-लुप्-वप्-शप्-स्वप्-सृप्स्त्रयोदश। भान्तेषु यभ्-रभ्-लभस्त्रयः। मान्तेषु गम्-नम्-यम्-रमश्चत्वारः। शान्तेषु क्रुश्-दंश्-दिश्-दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशो दश। षान्तेषु कृष्-त्विष्-तुष्-द्विष्-दुष्-पुष्य-विष्-विष्-शिष्-शुष्-श्लिष्या एकादश ॥ सान्तेषु घस्-वसती द्वौ। हान्तेषु दह्-दिह्-दुह्-नह्-मिह्-रुह्-लिह्-वहोऽष्टौ[xiii]।

अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम्।

तेषाम् च धातूनाम् इडागमविधानार्थं पाणिनीना कानिचन सूत्राण्यपि प्रणीतानि तेषु केचन योगाः अधो उपन्यस्यन्ते। यथा--

**आर्धधातुकस्येड् वलादेः** (७.२.३५)[xiv]

अनेन शास्त्रेण वलादेः आर्धधातुकस्य इडागमः भवति। यथा पठितम् इत्यत्र पठ्धातोः परम् क्तप्रत्ययः विहितः क्तप्रत्ययस्य तिङ्शिद्भिन्नत्वात् आर्धधातुकं शेषः इति आर्धधातुकसंज्ञायाम् क्तप्रत्ययस्य अनुबन्धलोपे वलादित्वात् प्रकृतसूत्रेण इडागम विधीयते।तेन पठ् +इ+त इति स्थिते तेन पठित इति भवति। अग्रे प्रक्रियाकार्ये पठितम् इति रूपम् भवति।

**नेड् वशि कृति (७.२.८)**

वशादे नेट् वशि कृति (७.२.८) वशादेः कृत इडागमो न भवति। सुशर्मा इत्युदाहरणम्।

**तितुत्रतथसिसुसरकसेषु च** (७.२.९)

ति, तु, त्र, त, थ, सि, सु, सर, क, स इत्येतेषां दशानां बलाद्यार्धधातुकप्रत्ययानामिडागमो न भवति। तीति क्तिङ्क्चोः सामान्यग्रहणम्।रूपाणि च भवन्ति - शस्त्रम्। योत्रम्। योक्रम्। स्तोत्रम्। तोत्त्रम्। सेत्रम्। सेक्रम्। मेढ्रम्। पत्त्रम्। दंष्ट्रा। नद्ध्री।

**एकाच उपदेशेऽनुदात्तात्** (७.२.१०)

यः धातु औपदेशिक-अवस्थायामनुदात्त-एकाच्-अस्ति, तस्मात् परः इडागमः न भवति। अनेन सूत्रेण 'अनिट्' धातोः व्याख्या दीयते । यस्मिन् धातौ औपदेशिक-अवस्थायाम् (इत्-संज्ञकं स्वरं विहाय) केवलं एकः एव स्वरः अस्ति, स च अनुदात्तः अस्ति, तादृशात् धातोः परः इडागमः न भवति । अतः एतादृशः धातुः 'अनिट्' अस्ति इत्युच्यते ।

**श्र्युकः किति** (७.२.११)

श्रि इत्येतस्य उगन्तानां च किति प्रत्यये परतः इडागमो न भवति। श्रिय एकाच उगन्ताच परयोर्गित्कितोरिण्न स्यात् । परमपि स्वरत्यादिविकल्पं बाधित्वा

पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। यथा - सस्वरिव। श्रि श्रित्वा। श्रितः। श्रितवान्। उगन्तानां चयुत्वा। युतः। युतवान्। लूत्वा। लूनः। लूनवान्। वृत्वा। वृतः। वृतवान्। तीर्त्वा। वीर्णः। तीर्णवान्।

**सनि ग्रहगुहोश्च** (७.२.१२)

ग्रह गुह इत्येतयोः उगन्तानां च सनि प्रत्यये परतः इडागमो न भवति। जिघृक्षति। जुघुक्षति। उगन्तानां च रुरूषति।

**कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि (७.२.१३)**

कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेषां लिटि प्रत्यये इडागमो न भवति। उदाहरणं यथा चकृव, चकृम।

**श्रीदितो निष्ठायाम् (७.२.१४)**

श्वयतेरीदितश्च निष्ठाया इण्न। उन्नः। उत्तः। त्राणः। त्रातः। घ्राणः। घ्रातः। ह्रीणः। ह्रीतः।

**यस्य विभाषा - (७.२.१५)**

यस्य धातो क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात् यस्य इत्यस्य यस्मादित्यर्थः अर्थात् यस्मात् धातोः क्वचिद् यदि विभाषया इड्विहितः ततः निष्ठायाः इण्न भवति इति सूत्रार्थः। उदाहरणं - विधूतः।

**लिङ्सिचोरात्मनेपदेषु (७.२.४२)**

वृतो लिङि सिचि च आत्मनेपदपरे इडागमः विकल्पेन भवति इति सूत्रार्थः भवति। उदाहरणं यथा वृषीष्ट इति।

**वस्वेकाजाद्घसाम्** (७.२.६७)

क्वसु-प्रत्ययोऽपि वशादिः कृत्। किन्त्वस्येडागमो भवति।

**स्नुक्रमोरनात्मनेपदनिमित्ते** (७.२.३६)

स्नु, क्रम, एतौ धातू सेटो, किन्त्वाभ्यां परस्यात्मनेपदस्येडागमो न भवति। भावकर्म-कर्मकर्तृकर्मव्यतिहारादिषु भवत्यात्मनेपदम्। तत्र न भवतीडागमः। प्रस्नोसीष्ट प्रक्रसीष्ट अन्यत्र तु भवति। यथा - प्रस्नविता प्रकमिता इति।

**परिशीलनग्रन्थसूची**


1. भट्टोजिदीक्षितः। २००८। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनी-व्याख्यासमन्विता)।
2. व्याकरणशास्त्रेतिहासः। २००८। त्रिपाठी ब्रह्मानन्दः सम्पादकः। वाराणसी।
3. बलदेवः उपाध्यायः। २००१। संस्कृतवाङ्मय का बृहद् इतिहास।
4. कं.वे.रामकृष्णमाचार्यः। २०१०। भूषणसारतत्त्वप्रकाशिका। शतपथी हरेकृष्णः सम्पादकः। तिरुपतिः। राष्ट्रियसंस्कृतविद्यापीठम्।
5. युधिष्ठरमीमांसकः। संस्कृत व्याकरणशास्त्र का इतिहास। काशी। भारतीय प्राच्यविद्या प्रतिष्ठान।
6. आचार्यरामचन्द्रमिश्रः। २०१३। संस्कृतसाहित्येतिहासः। चौखम्बा विद्याभवनम्। वाराणसी।
7. महर्षिः पतञ्जलिः। २०१७। व्याकरणमहाभाष्यम्। ( सप्रदीपोद्योत-भावबोधिनी-हिन्दीव्याख्योपेतम्) । प्रो. जयशङ्करलालत्रिपाठी। चौखम्बा सुरभारती प्रकाशन। वाराणसी।
8. श्रीनागेशभट्टः। लघुशब्देन्दुशेखरः (षट्टीकोपेतः)। प्रो. बालशास्त्री सम्पादकः। चौखम्भा सुरभारती प्रकाशनम्। वाराणसी।
9. आचार्यभवनाथशास्त्री। प्रयोगपल्लवः।ड. प्रो श्रीशशिनाथ झा सम्पादकः। कामेश्वरदरभङ्गा संस्कृतविश्वविद्यालयः।


---

[i] महाभाष्यम्

[ii] वैयाकरणभूषणसारः

[iii] प्रत्ययाः

[iv] पाणिनीयसूत्रम्

[v] पाणिनीयसूत्रम्

[vi] प्रयोगपल्लवः

[vii] प्रयोगपल्लवः

viii प्रयोगपल्लवः

ix अनिट्धातवः

x विकल्पेन इट्

xi प्रयोगपल्लवः

xii सिद्धान्तकौमुदी

xiii धातुपाठः

xiv पाणिनीयसूत्रम्